
# पञ्चम: पाठ: । वीरवनिता विश्पला।

ऋग्वेदात् उद्धृता अतीव अद्भुता रोमाञ्चकारिणी च एषा कथा स्त्रीणां सामर्थ्यं दर्शयति (ऋ.१.११६.१५)। शल्यक्रियाविशारदौ अश्विनीकुमारौ प्रगतवैद्यकतन्त्रज्ञानस्य मूलाधारौ स्त: । विश्पलाया: चरित्रं प्रेरणादायकं खलु सर्वेषां कृते ।– **सम्भाषणसन्देश–मासिकात्** ।







खेलराज: नाम कश्चित् नृप:। विश्पला तस्य पत्नी। सा यथा महाविदुषी आसीत्, तथैव रणकुशला अपि आसीत्। खेलराज: अपि शूर: पराक्रमी च आसीत्। स: विश्पलया सह सुखेन जीवति स्म।

अथ कदाचित् शत्रव: खेलराजस्य राज्ये आक्रमणं **कृतवन्त:**। महत् युद्धम् आरब्धम्। सेनाया: नायक: खेलराज: रणरङ्गं **प्रविष्टवान्**। विश्पला अपि रणरङ्गं **प्रविष्टवती**। भुवम् अवतीर्णा चामुण्डेश्वरी इव सा शत्रूणां संहारं **कृतवती**। तस्या: शौर्यं पराक्रमं च दृष्ट्वा शत्रव: अपि चकिता: अभवन्।

'एषा रणरङ्गात् यावत् न निवार्यते तावत् जय: सर्वथा न प्राप्यते' इति चिन्तयित्वा शत्रुसैनिका: युगपत् आक्रम्य ताम् **अवरुद्धवन्त:**। शत्रुसैनिका: ते असङ्ख्या: आसन्, विश्पला तु एकाकिनी ! तथापि तस्या: मनसि न भीतिलेश: अपि आसीत् । प्रत्युत द्विगुणितेन उत्साहेन युद्धं **कृतवती**। युद्धसमये शत्रुसैनिका: तस्या: एकं पादं **कर्तितवन्त:**। अनन्तरम् 'इत: परम् एतस्या: कारणात् पीडा न भविष्यति' इति निर्णयं कृत्वा ते शिबिरं **प्रतिगतवन्त:**।



यद्यपि विश्पलाया: पाद: भग्न: तथापि सा हतोत्साहा न जाता। चैतन्यमूर्ति: सा वीराङ्गना एव आसीत्। 'श्व: मया युद्धं करणीयम् एव' इति निश्चित्य सा पादं पुन: प्राप्तुम् ऐच्छत्। अत: सा निश्चलतया उपविश्य अश्विनीकुमारयो: ध्यानं **कृतवती**। तस्या:



भक्ते : कारणात् अश्विनीकुमारौ लोहयुक्तं पादं योजयित्वा तां यथापूर्वं **कृतवन्तौ**। एतस्मात् विश्पला यथापूर्वं चलितुं युद्धं कर्तुं च समर्था जाता।

अनन्तरदिने प्रातः सा महता उत्साहेन रणरङ्गम् **आगतवती**। रणरङ्गे तां दृष्ट्वा एव शत्रुसैनिकाः चकिताः भीताः च। तस्याः दर्शनमात्रेण एव तेषां धैर्यं नष्टं जातम्। सा यदा आयुधप्रहारम् **आरब्धवती** तदा ते सर्वथा हतोत्साहाः जाताः। विश्पला शत्रून् कदलीवृक्षान् इव लीलया **कर्तितवती**। सहस्राधिकाः सैनिकाः तया संहताः।

एवं विश्पलायाः शौर्यस्य कारणतः तस्मिन् युद्धे खेलराजस्य एव जयः अभवत्।

वीरवनिता विश्पला भर्त्रा सह रणरङ्गं प्रविश्य शौर्येण युद्धं **कृतवती**। पादकर्तनानन्तरमपि अश्विनीकुमारयोः अनुग्रहेण पादं पुनः **प्राप्तवती** शत्रून् **संहृतवती** च। एतेन साहसेन सा वेदवाङ्मये बहुधा प्रशंसिता।

विश्पलायाः शौर्यं तथा च अश्विनीकुमारयोः शल्यक्रियाकौशलं स्मरन्तु इति अस्मान् उपदिशति इतिहासः।

## भाषाभ्यासः



### १. उचितं पर्यायं चित्वा रिक्तस्थानानि पूरयत।

अ) शत्रवः ____। (कृतवान्/कृतवन्तः)
आ) खेलराजः ____। (प्रविष्टवन्तः/प्रविष्टवान्)
इ) विश्पला ____। (प्रविष्टवान्/प्रविष्टवती)
ई) सा युद्धं ____। (कृतवान्/कृतवती)
उ) शत्रुसैनिकाः ____। (अवरुद्धवन्तौ/अवरुद्धवन्तः)
ऊ) सैनिकाः शिबिरं ____। (गतवन्तः/गतवन्तौ)
ए) शत्रुसैनिकाः पादं ____। (कर्तितवन्तः/कर्तितवन्तौ)
ऐ) सा रणाङ्गणम् ____। (आगतवत्यौ/आगतवती)
ओ) विश्पला ध्यानम् ____। (आरब्धवान्/आरब्धवती)
औ) अश्विनीकुमारौ तां यथापूर्वं ____। (कृतवन्तौ/कृतवत्यौ)

### २. स्तम्भमेलनं कुरुत।

| | | | | | |
|---|---|---|---|---|---|
| अ | १. लोहयुक्तम् | २. वीराङ्गना | ३. भीताः | ४. महत् | ५. शूरः |
| आ | १. युद्धम् | २. शत्रुसैनिकाः | ३. खेलराजः | ४. पादम् | ५. विश्पला |

### ३. अधोदत्तेषु विशेषणेषु यानि विशेषणानि विश्पलां न वर्णयन्ति तानि पृथुक्कुरुत।

चकिताः, अधीरा, प्रशंसिता, भीता, समर्था, निश्चला, एकाकिनी, चैतन्यमूर्तिः, अवरुद्धा, चामुण्डेश्वरी, महाविदुषी, रणकुशला, शूरः, नायिका, दुःखिता

### ४. माध्यमभाषया उत्तरं लिखत।

१. विश्पलायाः शौर्यस्य वर्णनं कुरुत ।
२. विश्पला अश्विनीकुमारयोः ध्यानं किमर्थं कृतवती ?

पाठात् धातुसाधित-अव्ययानि चिनुत पृथक्कुरुत च।

५. समानार्थकशब्दं पाठात् लिखत। अरि:, चरण:, वीर्यम्, सङ्गर:, रणाङ्गणम्, रक्षका:, पण्डिता, वीक्ष्य, वेदना, अगणिता: ।

६. विरुद्धार्थकशब्दं पाठात् लिखत। मित्रम्, कातरता, असमर्था, कातर:, पराजय: ।

मौखिककार्यम्-अधोदत्तं कार्यं केन कृतम् इति लिखत।

(अ) सेनाया: नायकत्वस्य स्वीकरणम्। (आ) राज्ये आक्रमणम्।
(इ) खेलराजस्य पश्चात् रणरङ्गं प्रवेश:। (ई) जयं प्राप्तुं युगपत् आक्रमणम्।
(उ) द्विगुणित-उत्साहेन युद्धम्। (ऊ) एकपादकर्तनम्।
(ए) शिबिरं प्रत्यागमनम् । (ऐ) विश्पलाया: दर्शनमात्रेण धैर्यनाशनम्।
(ओ) सहस्राधिकसैनिकानाम् संहरणम्। (औ) आयुधप्रहारेण उत्साहनाशनम्।

(विसर्गस्य परिवर्तनं निरीक्षध्वम्।) पठत अवगच्छत ! विश्वं विसर्गस्य ।

● अम्भोधिर्जलधि: पयोधिरुदधिर्वारान्निधिर्वारिधि:।
अम्भोधि: + जलधि:
पयोधि: + उदधि:
+ वारान्निधि: + वारिधि:। } र्रूप: विसर्ग:

परोपकार: कर्तव्य: प्राणैरपि धनैरपि।
प्राणैरपि = प्राणै: + अपि।
धनैरपि = धनै: + अपि। } र्रूप: विसर्ग:

● उत्तमा मध्यमा नीचास्तिस्रो वै प्राणिनां विधा:।
परार्थस्वार्थविध्वंसा लक्षणानि यथाक्रमम्।।
उत्तमा: + मध्यमा:
परार्थस्वार्थविध्वंसा: + लक्षणानि } लोपी विसर्ग:

● मा मनो मधुपो मेघो मद्यपो मर्कटो मरुत्।
मक्षिका मत्कुणो मत्स्यो मकारा दश चञ्चला:।।
मन: + मधुप: + मेघ: + मद्यप: + मर्कट: + मरुत्।
मत्कुण: + मत्स्य: + मकारा:। ओकाररूप: विसर्ग:
मकारा: + दश। लोपी विसर्ग:

● स हि भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्र:।।
दरिद्र: + यस्य
क: + दरिद्र: } ओकाररूप: विसर्ग:

● हंसश्श्वेत: बकश्श्वेत: को भेदो बकहंसयो:।
नीरक्षीरविवेके तु हंसो हंसो बको बक:।।

| | | |
|---|---|---|
| हंस: | हंसश् | } श्रूप: विसर्ग: |
| बक: | बकश् | |
| क: | को | } ओकाररूप: विसर्ग: |
| भेद: | भेदो | |
| हंस: | हंसो | |
| बक: | बको | |

● त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वम् इन्द्रस्त्वम् अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवस्स्वरोम्।।

| | | |
|---|---|---|
| विष्णु: | विष्णुस् | } स्रूप: विसर्ग: |
| रुद्र: | रुद्रस् | |
| अग्नि: | अग्निस् | |
| वायु: | वायुस् | |
| सूर्य: | सूर्यस् | |
| चन्द्रमा: | चन्द्रमास् | |

## उपपदविभक्तय: (धातव:)।

१. गम् = (द्वितीया) पाण्डवा: हस्तिनापुरम् अगच्छन् ।
२. कुप् = (चतुर्थी) माता शिशवे कदापि न कुप्येत् ।
३. क्रुध् = (चतुर्थी) स्वामिनी भृत्याय क्रुध्यति ।
४. दा-यच्छ् = (चतुर्थी) शिष्या: गुरवे दक्षिणां यच्छन्तु ।
५. कथ् = (चतुर्थी) अप्सरसौ देवेन्द्राय वृत्तान्तम् अकथयताम् ।
६. रक्ष् = (पञ्चमी) कृष्ण: सङ्कटात्/आपद: गोपालान् रक्षति ।
७. वि + रम् = (पञ्चमी) त्वं वृथाकलहात् विरम ।
८. स्निह् = (सप्तमी) वयं भ्रातृषु स्निह्येम ।
९. रुच् = (चतुर्थी) नरेन्द्राय व्यायाम: रोचते ।
१०. स्पृह् = (चतुर्थी) गौरी कुण्डलाय स्पृहयति ।


गणेशाय मोदका: रोचन्ते।
गणेश: मोदकेभ्य: स्पृहयति।


शिवाय बिल्वपत्राणि रोचन्ते।
शिव: बिल्वपत्रेभ्य: स्पृहयति।


महालक्ष्म्यै कमलं रोचते।
महालक्ष्मी: कमलाय स्पृहयति।

एष: निखिल: । निखिलाय किं किं रोचते?


निखिलाय


लड्डुका: रोचन्ते ।




शाला रोचते ।


पुस्तकानि रोचन्ते ।


गणितसंस्कृते रोचेते ।

एषा काश्मीरा । काश्मीरा कस्मै/कस्यै स्पृहयति ?


काश्मीरा


कण्ठहाराय स्पृहयति।


शशकाभ्यां स्पृहयति।


जलक्रीडायै स्पृहयति।


वेणवे स्पृहयति।